# INDIAN SCHOOL AL WADI AL KABIR

| Class: VII-3rd Lang. | Department: Sanskrit | Date of submission: N.A |
|---|---|---|
| Worksheet no. 2 | Topic : अपठित – अवबोधनम् | Note: Pl. file in portfolio |

*** निम्नलिखित अनुच्छेदान् पठित्वा प्रश्नान् उत्तरयत |**

**1.** विद्यायाः आलयः विद्यालयः कथ्यते। सामान्यतः विद्यालयस्य भवनं अतिविशालं सुन्दरं च भवति। छात्राणाम् अध्यापनाय बहूनि रुचिराणि प्रकोष्ठानि अपि भवन्ति । तत्र एकं विशालं क्रीडास्थलं भवति। विद्यालये एकः विशालः पुस्तकालयः अपि भवति। विद्यालये ये शिक्षकाः भवन्ति ते ज्ञानस्य दातारः भवन्ति। अतः ते सदैव पूज्याः मान्याः च भवन्ति ।

**(क) एकपदेन उत्तरत।**

(i) विद्यायाः आलयः कः कथ्यते ? ................................ (ii) विद्यालयस्य किं विशालं भवति ? ................................

(iii) शिक्षकाः कस्य दातारः ? ................................ (iv) के सदा पूज्याः मान्याः च भवन्ति ? ................................

**(ख) पूर्णवाक्येन उत्तरत।**

(i) छात्राणाम् अध्यापनाय कानि भवन्ति ? ..........................................................................

(ii) शिक्षकाः कथं पूज्याः मान्याः च भवन्ति ? ..........................................................................

**2.** भारतं पर्वणां देशः अस्ति। दीपावली अपि अस्य एकं प्रमुखं पर्वम् अस्ति। अयं महोत्सवः कार्तिकमासस्य अमावस्यायाम् आगच्छति। जनाः अस्मिन् अवसरे लक्ष्मी-गणेशयोः पूजां कुर्वन्ति। अस्मिन् एव दिवसे श्रीरामः दुष्टं रावणं हत्वा सीतां नीत्वा अयोध्यां प्रत्यागच्छत्। इदं पर्व ज्योति-पर्व अपि कथ्यते।

**(क) एकपदेन उत्तरत।**

(i) भारत-देशस्य प्रमुखं पर्व किम् अस्ति ? ................................ (ii) इदं पर्व कदा आगच्छति ? ................................

(iii) जनाः कयोः पूजां कुर्वन्ति ? ................................ (iv) श्रीरामः कं दुष्टम् अहनत् ? ................................

**(ख) पूर्णवाक्येन उत्तरत।**

(i) अस्मिन् दिवसे श्रीरामः किम् अकरोत् ? ..........................................................................

**(ग) निर्देशानुसारेण उत्तरत।**

(i) कुर्वन्ति इत्यत्र किं वचनम् ? ........................